## सोऽपदादौ । (३८/१५२)

सकार आदेशः भवति विसर्जनीयस्य कुप्वोः अपदाद्योः परतः पाशकल्पककाम्येषु । 'याप्ये पाशप्' (५.३.५७/१९९३) – पयस्पाशम् । ईषदसमाप्तौ कल्पप् (५.३.६७/२०२२) – पयस्कल्पम् । यशस्कल्पम्[1] । 'प्रागिवात् कः' (५.३.७०/२०२५) – [2]पयस्कम् । यशस्कम् । काम्यच् (३.१.९/२६६३) – पयस्काम्यति । यशस्काम्यति । अपदादौ इति किम् ? पय ⌣⌢ कामयते । पय ⌣⌢ [3]पिबति ।

[९३९] सोऽपदादावित्यनव्ययस्येति वक्तव्यम् । (म. भा. ३. ४३२)

[4]इह मा भूत्, प्रातः कल्पम्, पुनः कल्पम् इति ।

[९४०] रोः काम्ये नियमार्थम् । (म. भा. ३. ४३२)

रोरेव काम्ये नान्यस्य इति नियमार्थं वक्तव्यम् । पयस्काम्यति । [5]यशस्काम्यति । इह मा भूत्, [6]गीः काम्यति । धूः काम्यति ।

[९४१] उपध्मानीयस्य[7] कवर्गे परतः सकारादेशो भवतीति वक्तव्यम् । (म. भा. ३. ४३२)

किं प्रयोजनम् ? उब्जिरुपध्मानीयोपधः पठ्यते इति[8] दर्शने अभ्युद्गः, समुद्गः इति यथा स्यात् ॥

## इणः षः । (३९/१५३)

[9]अपदादौ इति वर्तते । इणः उत्तरस्य विसर्जनीयस्य षकारादेशो भवति कुप्वोरपदाद्योः परतः पाशकल्पककाम्येषु । पाश – सर्पिष्पाशम् । यजुष्पाशम् । कल्प – सर्पिष्कल्पम् । यजुष्कल्पम् । क – सर्पिष्कम् । यजुष्कम् । काम्य – सर्पिष्काम्यति । यजुष्काम्यति । अपदादौ इत्येव, अग्निः करोति । वायुः [10]करोति । अग्निः पचति । वायुः पचति । कुप्वोः इत्येव, [11]सर्पिस्ते । यजुस्ते । इत [12]उत्तरं सः इति, इणः षः इति च वर्तते । तत्र इणः परो यो विसर्जनीयः तस्य षकारो भवति, अन्यस्य सकारो भवति ॥

## नमस्पुरसोर्गत्योः । (४०/१५४)

नमस् पुरस् इत्येतयोः [13]गतिसञ्ज्ञकयोः विसर्जनीयस्य सकारादेशो भवति कुप्वोः परतः । नमस्कर्ता । नमस्कर्तुम् । नमस्कर्तव्यम्[14] । गत्योः इति किम् ? पूः, पुरौ, पुरः[15] करोति[16] ॥

---

1. पयस्वलम् यशस्वलम् इत्यधिकम् क. 2. पयस्कः यशस्कः ड. 3. पचति ड. 4. इह नास्ति क.ड. 5. यशः काम्यति ड. 6. गीष्काम्यति घूष्काम्यति ड. 7. च इत्यधिकम् इ. 8. अत्र इत्यधिकम् क, अस्मिन् इत्यधिकम् ह. 9. वाक्यमिदं नास्ति इ. ड. 10. पिवति 3. 11. सर्पिष्टः यजुष्टः क, सर्पिस्तत्र यजुस्तत्र ब. ड. 12. उत्तरत्र इ. 13. गतिसञ्ज्ञयोः ह 14. पुरस्कर्ता पुरस्कर्तुम् पुरस्कर्तव्यम् त्यधिकम् ब. क, ड. इ. 15. पश्य ब. प. मं. 16. पुरः पवति इत्यधिकम् ह.